IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# गवामयन संवत्सर सत्रस्य स्वरूप विवरणं

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

सप्तसोमसंस्थायां अनिष्टोमादि सोमयागः एकाह इत्युक्ते एकदिनात्मकं सूत्याह, सोमरसहवनस्य एकं दिं अस्ति। द्विरात्रिः त्रिरात्रिः इत्यादि, द्वादशदिनपर्यन्तम् इत्युक्ते द्वादश नित्यं सूत्याह 'अहिन' सोमयागः अस्ति। दर दिनात्मकं सोमयागं उभयधर्मिणः स्य "अहीन धर्मिणः तथा सत्रधर्मिणः कर्त्तुं शक्नुवन्ति । द्वादशदिनम् अथवा तथो अधिकदिनं सूत्याह यः सोमयागः विद्यते सः सोमयागः सत्रधर्मी सोमयाग इति कथ्यते। एकवर्षपर्यन्तं प्रतिदिनं सूत्याह वर्तते सः सोमयागः संवत्सर सत्रं संबोधयन्ति । "गवामयन संवत्सर सत्र" संवत्सर सत्रस्य प्रकृतिः इति मन्यन्ते । त्रिसंवत्सरतः एकसहस्र संवत्सर पर्यन्तं प्रचलिष्यमाणानां सत्राणां ज्ञानोपलब्धिरत्र प्राप्यते ।

दीर्घकालीनः गवामयन संवत्सर सत्रं वैशिष्ट्यातिपूर्णः श्रौतयज्ञो वर्तते। अर्वाचीने इतिहासे संवत्सर सत्रं केनानुष्ठितं इति उल्लेखो नास्ति। उपलब्धि अपि नास्ति । प्राचीनकाले शौनकादिमहर्षिभिः सत्रं कृतमिति उल्लेखो वर्तते । कलियुगे निषिद्धकर्मसु सत्रयागस्य संदर्भः प्राप्यते । श्रौतसूत्रादिषु वेदवाङ्मयेषु सत्रस्य

"कलियुगे वर्जकर्मः" एवं कुत्रापि उल्लेखो न प्राप्यते ।

तात्पर्यं कलिनिषिद्धत्वात् "सत्रं मा करोतु" इति प्रबलशास्त्राधारो नैव दृश्यते । सद्यः काले सत्र मा करोतु इतिमते शास्त्रापेक्षया वास्तविक परिस्थितिः एव अधिकतया प्रबला दृश्यते । सद्यः ले अग्निहोत्रं स्वीकृत्य इष्टप्रथमयज्ञः (अग्निष्टोमम्) यैः कृताः तेषां सप्तदश अग्निहोत्रणां एकत्रीकरणं कष्टकरं दुःसाध्यञ्च । तत्रापि गवामयन सत्रम् इत्युक्ते द्वादशदिनानि दीक्षा, द्वादशदिनानि प्रवर्ग्योऽपसदः, त्रिशतोत्तर एक षष्ठिः सूत्याह इत्युक्ते आहत्य त्रिशतोत्तर पञ्चाशितिः दिनानि इत्युक्ते त्रयोदशमासपर्यन्तं गवामयन सत्रं प्रचलति । एतावद् दीर्घकाल दीक्षायाः व्रतं स्वीकर्तुं येषां केषामपि मानसिक, शारीरिक सिद्धता न भवति । कलियुगे सर्वत्र वेदविद्यायाः यज्ञसंस्थायाः -हास कालखण्डः आगतः अस्ति। अद्य आन्ध्र प्रदेश, तमिळनाडू विहाय भारते कुत्रापि सप्तदश अग्निहोत्रिणः न उपलभ्यन्ते ।

द्वितीयम् इत्युक्ते अग्निहोत्रणां मध्ये शास्त्राधारेण प्रत्यक्ष पशुः, आज्यपशुः, पिष्टपशुः हवनकर्तृणां मध्ये मतभेदाः वर्तन्ते । एतेन कारणेन विभिन्नेभ्यः प्रान्तेभ्यः आहात्य सप्तदशेभ्यः अग्निहोत्रणां द्वारा सत्रयागं कर्तुम् अशक्यं भाति ।

एतेषां सर्वेषां कारणस्यापेक्षया सत्रयागे सर्वे यजमानाः सर्वे ऋत्विजाः भवन्तीति नियमः । तेन कारणेन सत्रयागे दक्षिणाप्रदानविधिं वर्जीकृतं अस्ति। यज्ञफलं सर्वैः समप्रमाणेन प्राप्यते । एष अदक्षिणा यज्ञः । इदानिं सर्वेषां मनसि धनलालसा वर्तते । एतेन कारणेन सत्रयागे भागं वोढुम् एकः अपवादात्मकः आहिताग्निं विहाय केऽपि अग्निहोत्रणाः सिद्धाः न भवन्ति ।

वास्तविकदृष्ट्या अधीत वैदिकानां श्रौताग्निमाधानं कृत्वा अग्निष्टोमं कृत्वा, सत्रयागे भागस्वीकरणम् आवश्यं अस्ति । तत वैदिकानां कर्तव्यमेव। "वेदाहि यज्ञार्थमभिप्रवृत्ताः' एषः वैदिकसिद्धान्तः। वैदिकसंस्कृतिः यज्ञप्रधान अतः जातेष्टितः अन्त्येष्टि पर्यन्तं अग्निसंस्कारान् एव उक्तवन्तः । उपनयनान वेदाध्ययनस्यारम्भः संध्यावन्दनम् अग्निकार्यच नित्यकर्माः । चतुरो वेदान् ब्राह्मणग्रन्थान् ऊर्ध्वबाहुं कृत्वा केषां मन्त्राणां विनियोगं केषु श्रौतयज्ञेषु कथं करणीयमिति घोषयन्ति । परन्तु

ब्राह्मणग्रंथानां एतद् श्रौतयज्ञस्य प्रायोगिकज्ञानं विना केवलं मौखिकस्वरूपे एवं अवशिष्टः । वेद क्षेत्रेषु एषा महती त्रुटि अस्ति ।

सद्यः काले एकानियज्ञः प्रचलति । एवं सम्पूर्ण स्मार्तयज्ञे 2000 मन्त्राः आवश्यकाः भवन्ति । ऋग्वेदे 10555 मन्त्राः सन्ति । शेषः 8500 मन्त्राणां विनियोगं केषु यज्ञेषु कथं करणीयमिति सौमिकयज्ञकरणेन विना ज्ञातुं शक्नुमः ।

शुभलक्षणयुक्तः तेजस्वीप्रजा निर्माणमेतत् वैदिक संस्कृतेर्मूलं तत् अभिउपासना द्वारा एव भवितुं अर्हति। अतः विवाहहोमस्याग्निं संरक्ष्य गृह्याने उपासनां करोतु नवविवाहितानां कृते वेदशास्त्रे उक्तवन्तः । विवाहिताः अग्नि उपासनां अकृत्वा भार्यागमनं क्रियते चेत् मातृगमनसमानं महापातकं भवतीति महर्षि भारद्वाजानां वचनं चिन्तनीयम् ।

**औपासनं विना भार्यां गच्छेद्यः काममोहितः ।**

**तन्मातृगमनं प्रोक्तमसकृत् ब्रह्महा भवेत् ॥**

यस्मिन् क्षेत्रे वेदपाठशालाः प्रचलन्ति तस्यां तस्यां वेदपाठशालायां वेदाध्यापकैः स्वतः श्रौताग्निमाधानं कृत्वा अग्रे नूतन विद्यार्थिभ्यो श्रौतविद्याप्रदानं कर्तव्यम् । यतः पाठशालायां स्थल, जल, गोशाला, अग्निहोत्रे सहाय्यार्थं शिष्यवर्गः, आवास-निवास भोजन व्यवस्था, मासिक संभावना व्यवस्थाः आदि सर्वविध आवश्यक वस्तूनि उपलभ्यन्ते अनायासेन । अतः वेदपाठशालायां अग्निहोत्रस्य निर्माणं सहजं यम्। परन्तु धनलालसा, सुखमयजीवनेणं, तपःपूत जीवनविषये पराङ्गुखता, घासामर्थ्यविषये अज्ञानं, आलस्यं एवं विविध कारणेन अधितवैदिकाः श्रौताग्निं वा स्मार्ताग्नि उपासनाय प्रवृत्ता न भवन्ति । अतः गवामयनवत् सप्तदश अग्निहोत्रीणां सहभागः यत्र भवन्ति ते दीर्घकालीनाः परिश्रमसाध्यं, धनसाध्यं, तपःसाध्यं यज्ञकर्मः पूर्वं न अभवन् इतिमन्ये ।

इदानीं प्रचलित कालसन्दर्भे गवामयन सत्रस्य विचारः कृतः चेत्, एक विचारः प्रकर्षेण मनसि आयाति । तत् इत्युक्ते गवामयन सत्रे सामुहिकरित्या एक विचारेण परस्परं सहाय्येन यज्ञकर्मः करणीयः इति सहकार आंदोलनस्य सर्व मूलतत्त्वं संवत्सर सत्रयागे अस्ति । सत्राव्यतिरिक्तः एकाह अथवा अहीन प्रकारेण ये सोमयागाः सन्ति तेषु एकः आहिताग्निः यजमानः तेषां संकल्पप्रमाणेन सर्वे षोडशाः ऋत्विजाः एकस्मिन् सौमिक विहारे यज्ञकर्म कुर्वन्ति । तेभ्यः दक्षिणां यजमानो ददाति । अत्र यज्ञफलस्य अधिकारी यजमानः एक एव भवति ।

सर्वतोमुख सोमयागे एकस्य यजमानस्य कृते एकदिनस्य सूत्याह चतुसृषु दिक्षु चतुर्षु सौमिक विहारे आहत्य 64 ऋत्विजाः युगपत् सोमयागं कुर्वन्ति। इत्युक्ते सर्वतोमुख सोमयागे स्थान बाहुल्यं, ऋत्विजगणानां बाहुल्यञ्च भवति । परन्तु सूत्याहः यजमानश्च एक एव भवति ।

पौण्डरिक अथवा द्वादशाहवत् सोमयाग (अहिन प्रकारे) एकस्मिन् सौमिक विहारे एकः यजमानाय एकः ऋग्विज संघः एकादश उत द्वादशदिनं निरंतरं सूत्याहः कुर्वन्ति इत्युक्ते अहीन सोमयागे सूत्याह कालः बाहुल्यं भवति ।

परन्तु गवामयन संवत्सर सत्रे यजमान ऋत्विजयोर्मध्ये भिन्नता नास्ति । सत्रे भागं स्वीकृतवन्तः सर्वेऽपि यजमानाः ऋत्विजाश्च भवन्ति । यज्ञफलं सर्वैः समप्रमाणेन प्राप्यते । सहकारिसंस्थायां भागधारकरूपेण सर्वे सभासदाः स्वामित्वं लभ्यन्ति । तथा च सम्यक् चालनार्थं सर्वेऽपि कार्यं कुर्वन्ति इत्युक्ते एकरूपेण कर्मकराः भवन्ति । अन्यत् संस्थायां येषां रूप्यकाणां लाभः प्राप्यते तानि सर्वाणि रूप्यकाणि सर्वेषां समप्रमाणेन वयं वितरामः ।

सहकारिसंस्थायां संस्थाध्यक्षं यथा चिन्वन्ति तथा सत्र यज्ञेऽपि । तथैव सत्र यज्ञेऽपि 'गृहपतिः" सप्तदश अग्निहोत्रीषु ज्येष्ठत्व, ज्ञानवृद्ध, तपोवृद्ध सोमयाजन विषये अधिक्यं, धनवानं वा यः अस्ति तस्य ऊहम् उत चर्चां कृत्वा तं चिन्वन्ति। गृहपतेः सूत्रवत्, गोत्रवत् सत्रयज्ञः प्रचलति क्रियते। सहकारी आंदोलने निर्वाचनं अस्ति । परन्तु सत्रे सहमत्या विचार विमर्श्य चर्चया गृहपतिः, अध्वर्यु, होता, ब्रह्मा, उद्गाता, अन्ये ऋत्विजां चिन्वन्ति। सत्रे अन्य सोमयागवत् ऋत्विक्करणं, मधुपर्क, दक्षिणां अथवा यज्ञ सहाय्यार्थं सनिहार प्रेषणं एषा विधि नास्ति ।

यदि सप्तदश अग्निहोत्रिणां सहभागः सत्रे अशक्यं चेत् न्यून संख्यया येषां अग्निहोत्रं नभवति तेषां समावेशेन सत्रं भूयते । सर्ववेदेषु ब्राह्मणग्रन्थेषु, बौधायन, आपस्तम्ब, सत्याषाढ, कात्यायन, आश्वलायन, लाट्यायन, द्राह्यायण आर्षेयकल्पादि सर्वश्रौतसूत्रेषु अनेकानेके सूत्रे, सत्रयज्ञस्य उल्लेखः अस्ति । परन्तु गवामयन संवत्सर सत्र गतसहस्र वर्षेषु न अभवत् । तदर्थं तस्य प्रयोगग्रन्थः उपलब्धः नास्ति । केवलं श्रौतसूत्रे सन्दर्भः प्राप्यते।

अतः एव गतसंवत्सरे अनेकानेक श्रौत विद्वत् जनैः सह अनेकवारं विचार विमर्शं कृत्वा "श्रीयोगिराजवेद विज्ञान आश्रमस्य अध्यापकैः आप श्रौतसूत्रानुसारेण साग्निचित् गवामयन अवत्सा सत्रस्य अध्वर्यु प्रयोगः, आश्वलायन गुसारेण होत्रकाणां प्रयोगः आर्षेयकल्या नुसारेण उद्गातृ प्रयोगः मुद्रित स्वरूपे संपूर्णतया सज्जीकृताः । तथा अध्वर्यु प्रयोगः हस्तलिखित स्वरूपे अस्ति ।

यत्र कुत्रापि अप्राप्यमाणस्य गवामयन संवत्सर सत्रस्य सम्पूर्ण प्रयोग पुस्तकानि निर्मापयितुं अधिकाधिक योगदानं श्रौतयज्ञसंस्थायाः सेवारूपेण श्रीगुरुकृपया अभवत् ।

कृष्णयजुर्वेद संहितायाः सप्तमकाण्डे, ऐतरेयब्राह्मणे च "गावो वै सत्रमासत" एवं प्रारम्भं कृत्वा गवामयन सत्रस्य संपूर्ण विधानं अददत् । गोभिः यदा सत्र सम्पन्नं कृतं तदा तस्यां पादेषु काठिण्यभागः कवचवत् खुरः शृङ्गैः च नूतनतया प्राप्ताः । एवं तत्र निर्देशितं । भौतिकशास्त्र दृष्ट्या अस्य विचारः क्रियते चेत् पूर्व गोभ्यः खुरशृङ्गेच न आसन् । अस्मिन् संवत्सर सत्रे गोप्रजायां वांशिकदृष्ट्या काठिण्य खुरः शृङ्गे च भूयमाण नूतनप्रजाभ्यः प्रयोगं कृत्वा निर्माप्यते । एवम् अर्थवादः भूयते । कठिण खुरः इति कारणेन गाः आरण्ये कुत्रापि चरितुं तथाच शृङ्गैः संरक्षण समर्थाः अभवन् । अतः एव एतत् देषुदणत्रे,नलं संवत्सर सत्र 'गवामयन सत्र' इति नाम्ना प्रसिद्ध भवितुं शक्यते ।

गवामयन सत्रस्य संकल्प "गवामयन सर्वकामाः" एवमपि आश्वलायन सूत्रेण निर्दिश्यते। अतः "सर्वेऽपि सुखिनः सन्तु" एषा हढाकाइक्षा करणीया वर्तते । सत्रे भाग स्वीकर्तृणां कृते ध्येयवादः आवश्यकः । दक्षिणालाभार्थं अथवा धनलालसया सत्रे यदि सहभागः स्वीक्रियते अथवा भूयते एतत् श्रौतसूत्रे गोमांसभक्षणवत् निषिद्धः महापापं मन्यते ।

तात्पर्यं एवं वर्तते मनसि किञ्चिदपि स्वार्थबुद्धिं न स्थाप्य गवामयन सत्रस्यानानं गवामयन संवत्सर सत्रे भागस्वीकर्तृभिः सम्पन्नं करणीयं । तदर्थं सत्री अग्निहोत्रणां विशिष्ट आध्यात्मिक पात्रता आवश्यकं । सत्रस्य व्यापकरूपेण अस्ति। तदर्थं सत्रि अग्निहात्रिणां शारिरीक, आध्यात्मिक, मानसिक संवेदनशीलता भवितव्या । तथैव सर्व प्रकारस्य प्रदूषणं किञ्चित् प्रमाणेन न्यूनं भूत्वा पञ्चमहाभूतानां पृथ्विआपतेज वायु आकाशश्च प्राकृतिक कार्ये सन्तुलनं भूत्वा “सर्वेऽपि सुखिनः सन्तु” एवं यज्ञफलस्य सिद्धिः भूयत । तथा च सत्रे ये भागधारिणः सन्ति ते “प्रकृ तिलयस्य" आध्यात्मिकानुभूतिं प्राप्नुवन्ति ।

एवम् आध्यात्मिकपात्रता सत्रे भागधारिणः भवितुं श्रौतसूत्रेषु सत्रिधर्माः एतेन नाम्ना प्रबोध्यते । पितृकर्म दैवकर्म च वर्जन्, यज्ञविहारं त्यक्त्वा ग्रामगमनं, शीघ्रतया चलनं धावनं, उच्चैर्हासः, स्त्रियासह वार्तालापः, अश्रद्ध अनार्यावचनं, असत्य वाचनं, क्रोधावेशः जलस्नानं, केशभूषा, वृक्षनौकारथारोहणं, नृत्यगीतवादनं अथवा श्रवणं, सूर्योदय-सूर्यास्ते संध्यावन्दनं न करणं एतत् सर्वं वर्जं कर्तुम् उच्यते । दुग्धं, फलानि, हविः शेषः इत्यादिना सेवनं, सूत्याहकाले सौम्यचरुं अधिकं पाचयित्वा सेवनं, ब्रह्मचर्यपालनं कर्तव्यमिति सत्रधर्मि उच्यते । एते सर्वे नियमाः आध्यात्मिकपात्रता निर्मापयितुं शक्यते ।

गवामयन सत्रस्य अनुष्ठानेन अन्या एका महत्वपूर्णा सिद्धिर्जायते। मम 33 दिनात्मकं साग्निचित् द्वादशाह सोमयागः अभवत्। तस्मिन् यज्ञकाले भागधारिणाः ऋत्विजाः विद्यार्थिनः विश्रामकाले निद्रायां अपि याज्ञियमन्त्रान् वदन्ति स्म । गवामयन सत्रस्य 385 दिनानां दीर्घकालीक अनुष्ठानेन भागधारिणां तेषां रक्तपेषीणां मध्ये सौमिक यज्ञ प्रक्रिया हढा भवति । तथा च अन्तर्बाह्य श्रौतयज्ञमय जीवितमूर्तेः निर्माणं भवति । एतदेव गवामयन सत्रस्य महत्फलम् ।

सत्रसमाप्त्यानन्तरं सहभागि अग्निहोत्रीणां दक्षिणासह अग्निष्टोमं कर्तव्यं इति आश्वलायनसूत्रे उच्यते।

उपरितन विचारधारेण प्रेरणां प्राप्य गवामयन संवत्सरसत्रस्य अनुष्ठानं कर्तुं वयं प्रवृत्ताः स्मः । तत् श्री गुरु महाराजानां कृपाप्रसादेन सिद्धि अभवत् ।

गवामयनसत्रस्य अध्वर्यु, हौत्र, उद्गातृ प्रयोगं सम्पूर्णतया निर्माणं कारयितुं नक्कवारीपालेम, आन्ध्रस्थाः स्वर्गवासी ब्रह्मश्री सोमयाजी व्यंकटेश श्रौतीगारुएतैः अस्वस्थ प्रकृतिः अस्ति चेदपि अत्यन्तं प्रेम्णा निरपेक्षतया सर्वप्रकारेण मार्गदर्शनं, सहाय्यम्, अकुर्वन् । तदर्थं वयं तेषां ऋणिनो भवामः । वैदिकसंशोधनमण्डलेन श्रौतविद्वान् श्री चिं. ग. काशीकर एतेषां सम्पादकत्वेन सप्तसोम यज्ञानां ग्रन्थाः प्रसिद्धा अभवन् तेषामपि उपयोगः अभवत् । तदर्थं वयं कृतज्ञाः ।